# पुरुष सूक्तम्

ॐ तच्चं योरावृंणीमहे । गातुं यज्ञायं । गातुं यज्ञपंतये । दैवी
स्वस्तिरंस्तु नः । स्वस्तिर्मानुंषेभ्यः । ऊर्ध्वं जिंगातु भेषजम् । शं नो
अस्तु द्विपदे । शं चतुंष्पदे ।

ॐ शान्तिः शान्तिः शान्तिंः ॥

सहस्रंशीर्षा पुरुंषः । सहस्राक्षः सहस्रंपात् ।
स भूमिं विश्वतों वृत्वा । अत्यंतिष्ठद्दशाङ्गुलम् ॥

पुरुंष एवेदगं सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृंतत्व स्येशांनः । यदन्नेनातिरोहंति ॥

एतावांनस्य महिमा । अतो ज्यायागंश्च पूरुंषः ।
पादोऽस्य विश्वां भूतानिं । त्रिपादंस्यामृतं दिवि ॥

त्रिपादूर्ध्व उदैत्पुरुंषः । पादोऽस्येहाऽऽभंवात्पुनंः ।
ततो विष्वङ्-व्यंक्रामत् । साशनानशने अभि ॥

तस्मांद्विराडंजायत । विराजो अधि पूरुंषः ।
स जातो अत्यंरिच्यत । पश्चाद्-भूमिमथों पुरः ॥

यत्पुरुंषेण हविषां । देवा यज्ञमतंन्वत ।

व॒स॒न्तो अ॑स्यासी॒दाज्यम् । ग्री॒ष्म इ॒ध्मश्श॒रद्ध॒विः ॥

स॒प्तास्या॑सन्-परि॒धयः॑ । त्रिः स॒प्त स॒मिधः॑ कृ॒ताः ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒नाः । अब॑ध्न॒न्-पुरु॑षं प॒शुम् ॥

तं य॒ज्ञं ब॒र्॒हिषि॒ प्रौक्षन्॑ । पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा अय॑जन्त । सा॒ध्या ऋष॑यश्च॒ ये ॥

तस्मा᳚द्य॒ज्ञात्-स॑र्व॒हुतः॑ । सम्भृ॑तं पृषदा॒ज्यम् ।
प॒शूग्-स्ताग्श्च॑क्रे वाय॒व्यान्॑ । आ॒र॒ण्यान्-ग्रा॒म्याश्च॒ ये ॥

तस्मा᳚द्य॒ज्ञात्स॑र्व॒हुतः॑ । ऋचः॒ सामा॑नि जज्ञिरे ।
छन्दाग्ं॑सि जज्ञिरे॒ तस्मा᳚त् । यजु॒स्तस्मा॑दजायत ॥

तस्मा॒दश्वा॑ अजायन्त । ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा᳚त् । तस्मा᳚ज्जा॒ता अ॑जा॒वयः॑ ॥

यत्पुरु॑षं॒ व्य॑दधुः । कु॒ति॒था व्य॑कल्पयन् ।
मुखं॒ किम॑स्य॒ कौ बा॒हू । कावू॒रू पादा॑वुच्येते ॥

ब्रा॒ह्म॒णो᳚ऽस्य॒ मुख॑मासीत् । बा॒हू रा॑ज॒न्यः॑ कृ॒तः ।
ऊ॒रू तद॑स्य॒ यद्वैश्यः॑ । प॒द्भ्याग्ं शू॒द्रो अ॑जायतः ॥

च॒न्द्रमा॒ मन॑सो जा॒तः । चक्षोः॒ सूर्यो॑ अजायत ।
मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ । प्रा॒णाद्वा॒युर॑जायत ॥

नाभ्या॑ आसीद॒न्तरि॑क्षम् । शी॒र्ष्णो द्यौः सम॑वर्तत ।
प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा॑त् । तथा॑ लो॒काग्म् अ॑कल्पयन् ॥

वेदा॒हमे॒तं पुरु॑षं म॒हान्त॑म् । आ॒दि॒त्यव॑र्णं॒ तम॑स॒स्तु पा॒रे ।
सर्वा॑णि रू॒पाणि॑ वि॒चित्य॒ धीरः॑ । नामा॑नि कृ॒त्वाऽभि॒वद॒न्॒, यदाऽऽस्ते॑
॥

धा॒ता पु॒रस्ता॒द्यमु॑दाज॒हार॑ । श॒क्रः प्रवि॒द्वान्-प्र॒दिश॒श्चत॑स्रः ।
तमे॒वं वि॒द्वान॒मृत॑ इ॒ह भ॑वति । नान्यः पन्था॒ अय॑नाय विद्यते ॥

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः । तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
ते ह॒ नाकं॑ महि॒मानः॑ सचन्ते । यत्र॒ पूर्वे॑ सा॒ध्यास्सन्ति॑ दे॒वाः ॥

अ॒द्भ्यः सम्भू॑तः पृथि॒व्यै रसा॑च्च । वि॒श्वक॑र्मणः॒ सम॑वर्त॒ताधि॑ ।
तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति । तत्पुरु॑षस्य॒ विश्व॒माजा॑न॒मग्रे॑ ॥

वेदा॒हमे॒तं पुरु॑षं म॒हान्त॑म् । आ॒दि॒त्यव॑र्णं॒ तम॑सः॒ पर॑स्तात् ।
तमे॒वं वि॒द्वान॒मृत॑ इ॒ह भ॑वति । नान्यः पन्था॑ विद्य॒तेऽय॑नाय ॥

प्र॒जाप॑तिश्चरति॒ गर्भे॑ अ॒न्तः । अ॒जाय॑मानो बहु॒धा विजा॑यते ।
तस्य॒ धीराः॒ परि॑जानन्ति॒ योनि॑म् । मरी॑चीनां प॒दमि॑च्छन्ति वे॒धसः॑ ॥

यो दे॒वेभ्य॒ आत॑पति । यो दे॒वानां॑ पु॒रोहि॑तः ।
पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तः । नमो॑ रु॒चाय॒ ब्राह्म॑ये ॥

रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे ॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ।
नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् ।
इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥

तच्चं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु
नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु
द्विपदे । शं चतुष्पदे ।

ॐ शान्तिः शान्तिः शान्तिः ॥

Web Url: http://www.vignanam.org/veda/purusha-suktam-devanagari.html